National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 187-191
© 2026 NJHSR
www.sanskritarticle.com

**अनिता**
शोधच्छात्रा,
श्री.ला.ब.शा.रा.सं.वि.वि,
नई दिल्ली -16

**प्रो. विचारी लाल मीना,**
प्रोफेसर – शिक्षाविभाग,
श्री.ला.ब.शा.रा.सं.वि.वि,
नई दिल्ली -16

**Correspondence:**
**अनिता**
शोधच्छात्रा ,
श्री.ला.ब.शा.रा.सं.वि.वि,
नई दिल्ली -16

# प्राच्यपाश्चात्यपरिप्रेक्ष्ये पर्यावरणसंचेतनाविमर्शः

**अनिता , प्रो.विचारी लाल मीना**

**सारांशः-**
सम्यग् चेतना संचेतनेति कथयितुं शक्यते सम्यग् चेतना इत्यस्याऽर्थो भवति पर्यावरणं प्रति तस्य संरक्षणे सम्वर्धने समुन्नयने च सर्वतोभावेन क्रियया च जागरणमिति। पर्यावरणस्य यानि च प्रमुखानि वा अङ्गानि सन्ति तान् प्रति अस्माकं जाग्रदावस्थायां यादृशः भावः जीवने भवति तदवदेव भावः आचरणं भवितव्यम्। भारतीये परिप्रेक्ष्ये एतत् पर्यावरणं तु देवसदृशमस्ति। तेषां सम्यग्रूपेण आराधना मानवैः क्रियते। तेषां सर्वविधं संरक्षणेन सह समुन्नयनाय अनेके विचाराः अस्माकं ज्ञानमीमांसायामस्ति। **"दसपुत्रसमः द्रुमः"** इति कथनेन अभिज्ञायते यत् वृक्षादीनां महन्महत्त्वमस्माकं ज्ञानमीमांसायाम् प्रतिपाद्य ते वृक्षाः वा पर्यावरणे विद्यमानानि तत्त्वानि सर्वे परोपकारिणः सन्ति। अनेन पर्यावरणेन विना मानवानां जीवनं कठिनतरमिति कथयितुं शक्यते। तत्रैव परिवेशेन सह सम्यग् येन समायोजनं मानवैः प्राणिभिश्च स्थाप्यते तत् संचेतनेति पदमुच्यते। वस्तुतस्तु पर्यावरणस्य संचेतनायाः महत्त्वपूर्णेषु अङ्गेषु तत्र क्षितिजल-पावक-गगन-समीरेषु अस्माकं सर्वदा जाग्रदावस्था स्यात्। तदेव अस्माकं भूतात्मकं यत् शरीरं तत् सर्वदा निरामयाः निरोगिणः स्वस्थ्याः सुखिनश्च भविष्यन्ति।

**मुख्यशब्दाः-** शोधपत्रेऽस्मिनधोलिखिताः मुख्यशब्दाः सन्ति। यथा- पर्यावरणम्, संचेतना, भारतीयज्ञानपरम्परा, ज्ञानमीमांसा, प्राच्य, पाश्चात्य, पञ्चभूतः, प्रदूषणम्, अवस्था, सहानुभूतिः, व्यवहारवादादयश्च।

**भारतीय-पर्यावरणसंचेतना-**

भारतीये परिप्रेक्ष्ये पर्यावरणं तत् संचेतनाश्च भारतीयज्ञानपरम्परायां देवादीनां यादृशं स्थानं विभिन्नेषु वेद-वेदाङ्गशास्त्रादीषु प्रदत्तमस्ति, तदाधारिता या च अखण्डेऽस्मिन् ब्रह्माण्डे संस्कृतिरस्ति। तस्यां संस्कृतौ तदवदेव स्थानं विभिन्नासु भारतीयसंस्कृतिषु पर्यावरणस्य कृते प्रदत्तमस्ति। एषा प्रकृतिरूपात्मकं पर्यावरणमस्मान् सकर्मणा सर्वं प्रयच्छति। मानवसभ्यतायाः प्राचीनतमकालादारभ्य अर्वाचीनकालं यावत् प्रकृतेः पर्यावरणस्य च विविधानि तत् रूपाणि यथा सूर्यः चन्द्रः, वसुमती, नद्यः, पर्वताः वृक्षा, (पञ्चपल्लवाः) पशवः पक्षिणः स्थानानि अस्याः सांस्कृतेःपूजाविधाने पूज्याः एवं च अभिन्नानि अङ्गानि सन्ति। एषा या पर्यावरणेति नाम्ना विख्याता प्रकृतिः सा मानवानां जीवनदायिनी काचित् विशिष्टा सत्ताऽस्ति। विषयेऽस्मिन् यदि वयं भारतीये परिप्रेक्ष्ये पश्यामश्चेत् भौगोलिकेन-खगोलीयेन-प्राकृतिकेन पर्यावरणेन सह नैतिकेन पर्यावरणस्य विषये एवं च आध्यात्मिकमान्तरिकं वा इत्यस्मिनपि विशेषावधानं दत्तमस्ति। अत्रत्याः विभिन्नेषु प्राकृतिकरूपेण विभक्तेषु पर्यावरणेषु तान् प्रति संचेतनासु यानि च महत्त्वपूर्णानि अङ्गानि तेषां संरक्षणाय तदोन्नानयनाय संवर्धनाय विभिन्नोपायानि च सन्ति। तेषां समेषां मूलभूततत्त्वानामङ्गानाञ्च समाहारः अस्माकं संस्कारेषु विभिन्ने सम्मानिते धर्मे च तत् सम्बद्धानां विचाराणां समाहारः अस्माकं मन्त्रद्रष्टारः प्रायोगिकाः वैज्ञानिकाः ऋषयः

सैद्धान्तिकाः निर्णायिकाश्च कृतवन्तः। येन वयं स्वयमेव वा स्वतः एव मानसिक-वाचिक-शारिरीकरूपेण शूचिता स्वच्छता इत्युभयोः पूर्वकं व्यवहारं क्रियां च कुर्मः प्रदर्शयामश्च। यथा- **"अद्भिः गात्राणि शुद्धयन्ति"** अनया प्रकृत्या पर्यावरणेन वा तया सह रागात्मकं सम्बन्धं संस्थाप्य व्यक्तित्वस्य तदनुगुणं प्रायशः स्वव्यवहारं प्रदर्शयति। पर्यावरणं नाम तु प्राणीनां संरक्षणप्रदायकं कवचमस्ति अर्थात् **अस्माकं परितः आवरणमिति**। अत्र आवरणमिति पदं संचेतनां प्रति सूचयति यत् वयं सर्वे स्वं परितः यदावरणं तान् सम्यग्रूपेण संरक्ष्य तदनुगुणमनुकूलं च मानवानां जीवनं भवितव्यम्। वस्तुतस्तु उभयोः प्राणी-पर्यावरणयोर्मध्ये अन्योन्याश्रयसम्बन्धेन सम्बन्धितोऽस्ति। एतदर्थं पर्यावरणस्य संचेतनां प्रति भारतीयज्ञानपरम्परायां तत् चिन्तनपरम्परायां तं प्रति संरक्षणस्य अवधरणाऽपि प्राचीनतमाऽस्ति। प्रकृतिः वा पर्यावरणं विना मानवानां जीवनं वा प्राणीणां जीवनं प्रायशः असम्भवः एव कथयितुं शक्यते। पर्यावरणस्य विभिन्नेषु-अङ्गेषु असन्तुलनतावशात् प्रतिदिनं वर्द्धमानेन तापेन हिमखण्डाः खण्डितो भूत्वा जनान् जीवान् वनान् च आतंकयति। इदानीं सर्वत्र **"ग्लोबल-वार्मिंग"** इति शब्दस्य यदर्थं या च क्रिया भवति तेन सम्पूर्णं विश्वमातं कितमस्ति। अस्य समाधानं वैश्विकाणां मानवानां वैज्ञानिकाणां बौद्धिकाणां अभियान्त्रिकादीनां च आह्वाहनपूर्णमिति कथयितुं शक्यते।

तत् सु महत्त्माह्वाहनपूर्णेषु **"पर्यावरण-प्रदूषणम्"** इति। तं प्रति मुख्यत्वेन शोधपत्रेऽस्मिन् स्वीकृतैषु चरेषु संचेतना इति योजितम् अस्ति। पर्यावरणप्रदूषणन्तु अर्वाचीनेऽस्मिन् काले वैश्विकाणां तत् वर्धकाणां जनानां च समक्षे एका भयतमा समस्या दशा वा समुपस्थितास्ति। यथा- पञ्चभूतैः मानवाः जन्मं प्राप्तवन्तः **क्षितिजल-पावक-गगन-समीरादीनां** सम्यग् संचेतनं मानवाणां सम्यग् जीवनाय अन्त्यतापेक्षिता मनोदशा सर्वैः मनावैः संचेतनता सम्पादनीया।

स्व-आतुरता नामकं भावं सम्यग् संतुष्ट्यर्थं यस्यां वा यस्मिन् प्रकृतौ वा पर्यावरणे जन्ममालभत तमेव नष्टं करोति। विश्वस्य उच्चतमेषु परिषत्सु याः महत्तमाः समस्याः समुपस्थापिताः वा चर्चिताः भवन्ति तासु सर्वासु अन्यतमा पर्यावरणे प्रदूषणस्य समस्याऽस्ति। वयं प्रकृतिं पर्यावरणं संरक्षणायामः तं प्रति संचेतनायामुन्नतिमानयामः।

वेदादिषु कालषु ऋतु-दिन-नियम-चर्यानुगुणं तत्कालिकाः मानवाः ऋषयः महर्षयः विद्वांसः मनीषिणः जीवन्ति स्म। तस्य कालस्य विषये विभिन्नेषु वेद-ब्राह्मण-आरण्यक-भाषासाहित्येषु तासु पालि-प्राकृत-अरबी-ग्रीक-लैटिन-हिन्दू-संवैधानिकभाषा-

क्षैत्रीयभाषासाहित्येषु वर्णितेषु तथ्येषु आधारेण कथयितुं शक्यते यत् तस्मिन् खलु काले पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि साहित्येषु मानवानां अस्याः समस्यायाः समाधानं शाब्दिकैः प्रमाणैः प्रदत्ताः सन्ति।

भारतीयज्ञानपरम्परायां वा संस्कृतज्ञानपरम्परायां प्रत्येकं प्राणीनां कल्याणार्थं जागरणार्थं च जागरूकाः आसन्। पर्यावरणसंचेतनां प्रति भारतीयसंस्कृततौ मनीषायाञ्च मूलोद्घोषः आदर्शवाक्यमपि अस्ति। यत्-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणिः पश्यन्तु मा कश्चिद् दुःखभाग्भवेत**।।

उक्तेऽस्मिन् पद्यविधायां विचारे सर्वेषां तत्र पर्यावरणसंचेतनायाः यानि अङ्गानि सन्ति तेषां सर्वेषां तत्र-पञ्चभूतैः समुत्पन्नानां मानवानां क्षिति-जल-पावक-गगन-समीर-ऋतु पर्वत-नदी-सरोवर-वृक्ष-वनस्पति-जीव-जन्तु-ग्रह-नक्षत्र-दिशादीनां सर्वेषां भावानां सुखतायाः, निरामयतायाः भद्रतायाः दुःखरहितायाः कामनाऽस्ति।

परि एवं च आङ् इत्युभयोः उपसर्गयोः संयोगेन वृञ् वरणे इति धातुना ल्यूट् (अन्) प्रत्ययेन पर्यावरणम् इति पदं निष्पद्यते।

तस्य पदस्य अर्थो भवति परितः आवरणमिति। अस्मान् परितः व्याप्तं यदावरणं तत् वातैः सर्वे पृथ्व्यिामावरणिताः सन्ति तदेव वातावरणमिति। अत्र आवरणन्तु परिधिः परिवेशादिभिः शब्दैः अर्थैश्च अस्माकं भारतीयमनीषायां सम्बद्धज्ञानपरम्परायाञ्च प्रयुक्ताः व्यवहृताश्च सन्ति।

साम्प्रतिके काले पर्यावरणस्य सर्वासु समस्यासु अन्यतमा प्रदूषणस्य समस्यायाः स्वरूपेण मानवाः प्राणिनश्च सजीवाश्च भयाक्रान्ताः सन्ति। एषा समस्या कालेऽस्मिन् न केवलं पृथ्व्याः अपि तु अन्तरीक्षस्या समस्यासु अन्यतमाऽस्ति। एतदर्थं वैदिक-कालिकाः मानवाः ऋषयः मर्हषः मन्त्रद्रष्टारः विद्वांसः आकाशादन्तरिक्षाभ्यामारभ्य व्यक्तेः तत् परिवेशस्य शान्तेः कामनां कृतवन्तः सन्ति। यथा यजुर्वेदे मन्त्रेषु-

**"द्यौः शान्तिरन्तरीक्षं शान्तिः पृथ्वीः शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिः विश्वेर्देवाः शान्तिः ब्रह्म शान्तिः सर्वं शान्तिः सामा शान्तिरेधि"**।।

वायुप्रदूषणन्तु मानवानां प्राणवायुरित्यस्मिनर्थे अतिहानिकरमस्तीति सर्वे अनुभूतिं कर्तुं शक्नुवन्ति। सः वायुः सम्यग् भवति चेत मानवाः स्वस्थाः निरामयाः सुखिनश्च भवन्ति। तत्रैव एषः वायुरिति परमौषधिर्भवति मानवानां प्राणीनां च कृते। यः प्रायशः विकटः नगरेषु अस्ति। ऋग्वेदे निगदितमस्ति यत्-

**"वत आ वातु भेषजम् स नो जीवात्वे कृधि।"**

अर्थात् हे वायु त्वं स्वास्थ्यस्य औषधिं भूत्वा वहतु। त्वं मम जीवनस्य आधारोऽस्ति। वस्तुतस्तु वायुप्रदूषणस्य अवरोधस्य संचेतनायाः लब्धौ नूनमेव सर्वे बालक-बालिकाः मानवाश्च समुन्नताः भवेयुः। तदेव औषधिरूपात्मकं वायुं वयं प्राप्तुं सम्यग्रूपेण समर्थो भविष्यामः।

मानवानां शरीरे आधिक्येन जलैः जिविताः अवयवाः सन्ति। प्रायशः सर्वेषां जीवधारीणां जीवनं जलमेव भवति। जलेऽस्मिन् विषये मातृतमा अर्थात् श्रेष्ठमाता इति पदस्य प्रयोगः ऋग्वेदोऽस्ति। यतोहि अस्य विश्वस्य जन्म जलेन अभवदस्ति। यथा-

**मातृतमा विषस्य स्थातुर्जगतो जनित्री।**

बृहदारण्यके उपनिषदि एतत् जलं सर्वेषां प्राणीनां भूतानां मधु अर्थात् अमृततुल्यमस्ति। यथा-

**इमा आपः सर्वेषां भूतानां मध्वासामपांसर्वाणि भूतानि मधु।**

अर्वाचीनेऽस्मिन् काले विशेषेन नगरेषु महानगरेषु पठित्वाधिगमनं वयं कुर्मश्चेत् अवबोधो भवति यत् विभिन्नाः सभ्यताः स्वस्य सर्वोत्कर्षं प्राप्य अवनतिं प्राप्य नष्टतां प्रति गतवत्यः।

अस्याः वर्त्तमनि प्रदूषितायाः पृथिव्याः माहत्म्यमाथर्ववेदे पृथ्वीसूक्ते निगदितमस्ति यत्-

**शिलाभूमिरश्माः पांसुः सा भूमिः संघृता घृता।**
**तस्यै हिरण्यवक्षये पृथिव्या अकरं नमः।।**

भारतीयज्ञानपरम्परायां तत्रापि संस्कृतज्ञानपरम्परायां हिरण्यगर्भा-पृथिव्याः एव अपरं नाम तत्र संज्ञा इति अस्ति। अस्याः पृथिव्याः वक्षयोः भूमिः पर्वताः अश्मखण्डाः दीर्घाः सूक्ष्माः कथिताः रत्नभूताः महद्भिः प्रतिष्ठिताः सर्जिताः देव-देविभ्यां साकमन्येषां महत्त्वप्रदायकाः अश्मखण्डाः मृदा विभिन्नवर्णीयाः रक्त-गौड़-कृष्ण-स्वरूपवतीमृदादयश्च सन्ति। तादृशीं हिरण्यगर्भां पृथ्वीं नौमि प्रणामामि च।

एषा पृथ्वी समग्रे सवर्ताभावेन च यदि पवित्रा भवति चेत् तस्याः प्रकृतौ पर्यावरणे च नूनमेव सर्वेषां मानवाणां जीवानां वृक्ष-पादप-पर्वतादीनां समग्रं विकासं भवितुं शक्नुवन्ति। एतदर्थं पर्यावरणस्य विभिन्नेषु पक्षेषु सभ्यानां सर्वेषां बालकबालिकाणामवधानं प्रदूषणस्य उपरि विजयाय भवितव्यम्। इमां प्रति समग्रा संचेतना सर्वेषां नूनमेव भवितव्या।

कृत्रिमे आनन्दे आनन्दिताः मानवाः अनेकैः अमूर्तैः सूक्ष्मैः रोगैः रूग्णाः सन्ति। तेषां ध्वनिप्रदूषणेन अनिद्रा-उन्माद-प्रमत्तादीनां विशेष-मानसिकरोगाणां संवर्धनं तत्सु क्षेत्रेषु सामान्येन द्रष्टुं वयं शक्नुमः। विभिन्नैः भूतैः विनिर्मितैरुपकरणैः निर्गतैः ध्वनिभिः मानवाः भीताः व्यथिताश्च। सन्ति। सम्यग् स्वास्थेन एव स्वस्थ्यम् अस्माकं भावात्मकं स्वास्थ्यं, आध्यात्मिकं स्वास्थ्यं, सामाजिकं स्वास्थ्यं भवति। तत्र ऋग्वेदे निगदितमस्ति यत् उच्चैः स्वरैः अस्माकं स्वास्थ्यं प्रभावितं भवति। अतः वार्तालापादीषु भाषणं वाचनं वा सामान्येन मधुस्वरेण भवितव्यम्। यथा-

**मा भ्राता भ्रातरं द्विक्षन् मास्वसारभूत स्वसा।**
**सम्यश्च सव्रता भूत्वा वाचं वदत् भद्रया।।**

अनेन प्रकारेण अर्वाचीनेऽस्मिन् काले विभिन्नेषु पर्यावरणप्रदूषणेषु मृदाप्रदूषणमपि अधुना भयावहमस्ति। ये च कृतज्ञाः विद्वान्सः वा सभ्याः मानवाः प्राणिश्च भवन्ति ते नूनमेव पृथ्वीं मातरमिति मत्वा स्वं, तस्याः पुत्रं स्वीकुर्वन्ति। ऋग्वेदे तत्र पृथ्वीसूक्ते एकस्मिन् मन्त्रे लिखितमस्ति यत् **"माता भूमिः पुत्रोऽहं पृथिव्याः"** इति। परञ्च दुष्टमनसा वच्मि यत् भारतं मातरं मानिताः जनाः इदानीं तामेव प्रदूषयन्ति। विभिन्नामौद्यौगिकसंयन्त्रैः उपसृतपादार्थैः मानव-मल-मूत्रैः विभिन्नैः वैज्ञानिकैः विनिर्मितैः पदार्थैः रंगेरादिभिः पृथ्वीं प्रदूषयन्ति। सर्वेषां मूले प्रदूषणमिति सर्वैः अर्वाचीनैः वैज्ञानिकैरुद्घोषयन्ति। तत् तत् राष्ट्राणामध्यक्षाः प्रमुखाश्च विभिन्नैः मञ्चैः सम्यग् प्रदूषणे विजयाय संवादं कुर्वन्ति। प्रदूषणस्य विभिषिका कीदृशी भवति तस्योदाहरणं वयं साक्षात् नेपालदेशे आगतैः जलप्रपातैः अवगन्तुमवबोद्धुं च शक्नुमः।

व्यवहारस्य मार्यादां विविच्य एव ध्वनेः प्रयोगं विधातव्यमन्यथा असंयमिता ध्वनिस्तु पर्यावरण ध्वनिप्रदूषणस्य सृष्टिं रचयति। यथा-

पर्यावरण संचेतनायाः तत्र सम्यग् तस्याः संरक्षणे समुन्नयने च तां प्रति मानसिके निर्णये तत्रापि तस्याः मानसिकदशायाः पवित्रतां प्रति अधिकं बलं भारतीयज्ञानपरम्परायां तत्र संस्कृतज्ञानपरम्पराया-मस्ति। तदाधारिता या च संस्कृतिरस्ति तस्यां मानवानामेश्वर्य-भौगयोः अभिलाषां (भावविशेषः) एव पर्यावरणप्रदूषणस्य मुख्यतमं कारणमस्ति। संस्कृते साहित्ये निगदितमस्ति यत्-

**सुखार्थमशुभं कृत्वा य एते भृषदुःखिताः।**
**आस्वादः स किमेतेषां करोति सुखमण्वपि।।**

वस्तुतस्तु सुखार्थाय अर्थात् एश्वर्याय मानवाः अशुभं कर्म प्रति अग्रेसराः भवन्ति तत् सम्प्राप्तये पर्यावरणं प्रकृतिं च आन्तरिकं बाह्यं च प्रदूषयन्ति। तेनैव तैः अनेकैः दुःखैः दुःखिता सन्ति। सुखं तु अणुमात्रमपि नास्ति। दशायामस्यां मानवाः प्राणिनश्च मानसिकरूपेण तथा च भावात्मकरूपेण तेनैव सह आध्यात्मिकरूपेण यावत् पवित्रं स्वच्छं उन्नतमानलब्धवन्तं भवति चेत् नुनमेव तेषां पर्यावरणसंचेतनालब्धिरपि उन्नता भवति। तेन तादृशाः ये याश्च उन्नतिलब्धवन्तः लब्धवत्यश्च भवन्ति ते ताश्च नूनमेव पर्यावरणस्य संचेतनाध्वंसकानां प्रदूषणतत्त्वानामुन्नमेलनाय प्राकृतिकं यत् स्वरूपं भवितव्यं तं प्रति अग्रेसराः भवन्ति। यतोहि भारतीयज्ञानपरम्परायां संस्कृतज्ञानपरम्परा-आधारिता या विश्वोत्तमा भारतीया संस्कृतिरस्ति तस्यां विभिन्नेषु कार्येषु अन्याः पवित्रता वा स्वच्छतापेक्षया मानसिकस्वच्छतायाः पवित्रतायाः उपरि अधिकं बलं प्रदत्तमस्ति।

विभिन्नेषु बाह्य पर्यावरणसंचेतनायाः प्रदूषणपक्षेषु विजयाय वनसंरक्षणाय संवर्धनाय च अनेके कार्यक्रामाः सामाजिकैः सर्वकारीयैः जनैः नूनमेव कुर्वन्ति तदेव **"एक वृक्ष माँ के नाम"** इति नवप्रसिद्धा योजना केन्द्रसर्वकारेण सर्वत्र महानगरेषु नगरेषु- अनुमण्डल-अंचल-ग्राम-भागादीषु च कारयन्ति तथा च विभिन्नैरूपागमैः तं कर्तुमभिप्रेरयन्ति च। तदेव विभिन्नाणां कठाणामकठाणं च रोषणं संरक्षणं सवर्धनं सर्वत्र भवन्ति। भारतीयज्ञानपरम्परायां तत्र संस्कृतज्ञानपरम्परायां निगदितमस्ति यत् वृक्षाः शिवकारकाः अर्थात् कल्याणकारकाः भवन्ति। येषामाश्रयं मानवो फलाय वा छायायै-कुर्वन्ति। यथा **"ततः शिव कुसुमित बालवादयः हलयाफलादर्थ-वृक्षमाश्रयते जनः।"**

एतदर्थं यजुर्वेदस्य नमस्ते इत्यस्मिन् अध्याये **" वृक्षेभ्यो नमः"** इत्युक्त्वा वृक्षजातीं प्रति विनम्र भावं प्रदर्शयति तत्कालिकाः मानवाः। वस्तुतस्तु ते सर्वे वृक्षाः श्रेष्ठाः प्रणम्याश्च च सन्ति। तत्रैव तस्य ज्ञानस्य परम्परायां तत्र मत्स्यपुराणे निगदितमस्ति यत् **"दसपुत्रसमोद्रुमः; अर्थात् एकः वृक्षः दस संततिः सदृशोऽस्ति। तत्रैव पर्जन्यादन्नसम्भवः**" एषोक्तिसर्वतो भावने व्यनक्ति यत् वर्षाभिरेवान्नः सम्भवो भवति। तावदीयो पर्यावरणस्य संचेतनायां भवितव्यम्। वर्षाजलस्य सम्यग् संरक्षाणाय अनेके उपायाः जायमानाः सन्ति। तथैव जनेषु जागरणपि सामाजिकाः सार्वकारिकाश्च जनाः कुर्वन्ति। अनेन प्रकारेण पर्यावरणसंचेतनायाः पक्षविशेषं प्रति सम्यग् स्वात्मनः जागरणाय अर्थववेदे निगदितमस्ति यत् मानवाः आचरणस्य वा

**जिह्वाया उग्रे मधु मे जिह्वामूले मधुफलम्।**
**ममेदह कृतावसौ मम चित्तमुषायसि।।**

अर्थात् मम जिह्वातः मधुरः स्वरः निर्गच्छेत्। ध्वनिसु माधुर्यमेवञ्च कर्मणि मुधरतायाः सनिश्चयेन वासः स्यात्। तदवदेव चित्तस्य चेतनायां माधुर्यं भवेत्।

अस्याः पर्यावरणसंचेतनायाः विभिन्नैः पक्षैः परिचिताः जागरूकाश्च भवेयुः। येन तेन पर्यावरणसंचेतनायाः असंचेतनाजन्याः याः समस्याः सन्ति तस्यां समाधानं सकलत्वेन भवेत्।

प्राकृतिकं संतुलनं स्वच्छवायुः, स्वच्छजलं, स्वच्छमृदा, वर्धमाना, जनसंख्या, औद्योगिकीकरणं तथा च उपभोक्तावादेऽस्मिन् पर्यावरण-संचेतना एव विनाशाय संरक्षणस्य मार्गोऽस्ति।

अस्याः पर्यावरणसंचेतनायाः कश्चन विशिष्टतमः सम्बन्धः आध्यात्मिकबुद्धया सह अस्ति। यथा फ्रिटक क्रैप्रा महाशयेन निगदितं यत् परिस्थितिकी आध्यात्मिकयोरूभयोः परस्परं धनिष्ठः सम्बन्धोऽस्ति यतोहि गंभीरपरिस्थितिकीया जागरूकता तु अन्ततः आध्यात्मिकी जागरूकता एव भवति।

Ecology and spirituality are fundamentally connected. Beeause deep ecological awareness ultimately, is spiritual awareness.

**पाश्चात्य परिप्रेक्ष्ये पर्यावरणसंचेतना**

दर्शनशास्त्रस्य एवं च तस्य महत्त्वपूर्णाङ्गस्य मनोविज्ञानस्य महत्त्वपूर्णेषु अंगेषु संचतेना इति सम्प्रत्ययः महत्त्वपूर्णोऽस्ति। पदोऽयं जाग्रतेरनुभूतिः एवं च दशायाः वर्णनं करोति।

सिगमंड फ्रायड महोदयः अस्य संचेतना इति पदस्य वर्गीकरणं वर्गत्रये कृतवान। यथा

**1. जाग्रतमनस (Conscious Mind)** - सा दशा यस्यां मानवाः वा पशवः वर्त्तमानि जायमानानां घटनानां अनुभवान्, विचारान्, भावान् प्रति च जागरूकाः वा जाग्रताः भवन्ति।

**2. अर्धजाग्रतमनस- (Preconscious Mind)** - अत्र तादृशाः विचाराः वा स्मृतयः भवन्ति ये वर्त्तमानि सक्रियाः न भवन्ति। सरलेन स्मरणं वयं कर्तुं सक्षमो भवामः।

**3. अचेतनमनस (Unconscious Mind)** - एषः मनः तादृशः भागः वा अङ्गविशेषोऽस्ति यत्र दमिताः इच्छा भय-भावादयश्च भवन्ति। येषां भावानामनुभूतिः सामान्यजनाः आभासं कर्तुं न पारयन्ति।

अस्य संचेतना इति सम्प्रत्ययस्य चतस्रः अवस्थाः भवन्ति। यथा-

**क. जाग्रतावस्था (Waking State)** एषा सामान्या वा सामान्य-दैनिक चर्या सम्पादनस्य सम्बद्धावस्था भवति।

**ख.निद्रावस्था (Sleep State)**- एषा प्राकृतिकावस्थाऽस्ति, यस्याम-वस्थायां चेतनायाः बाह्यजगतेभ्यः सम्पर्केषु अल्पतायाति एवञ्च मानसिक्याः प्रक्रियाः यथा स्वप्नादिनां मार्गदर्शनं क्रियासम्पादनं चलन्ति।

**ग. स्वप्नावस्था (Dreaming State)-**

निद्रायावस्थायामचेतनविचाराणां विम्बत्वेन प्रकटीकरणम्।

**घ. परिवर्तितावस्था (Altered State)-** अस्यामवस्थायां कस्यापि प्रभावेन एषा जाग्रतावस्था सदृशं कार्यं करोति। यथा ध्यानादीनां प्रभावेन व्यवस्थिता जाग्रतावस्था सम्मोहनादीनां प्रभावेण जायमानावस्था वा मादक-पदार्थाणां प्रभावेण जायमानादीनाम-वस्थानां परिगणामस्यां भवति।

**संचेतनायाः दर्शनिकं मनोवैज्ञानिकं च दृष्टिकोणम्-**

- **कार्यात्मकं दृष्टिकोणम् (Functionalism)** - विलियम जेम्स महोदयः स्वीकरोति यत् संचेतना एकः प्रभावोऽस्ति। (Stream of Consciousness) सः स्वीकरोति यत् संचेतना कश्चन स्थिरः पदार्थः नास्ति एषा तु विचारेषु अनुभवेषु नैरन्तर्येण प्रवहमाना प्रवाहोऽस्ति। येन सम्यग् तथा परिवेशेण वा पर्यावरणेन सह समायोजने मानवाः पशवश्च सक्षमोः भवन्ति।
- **व्यवहारवादः (Behaviorism)**- अस्य वादस्य प्रवर्तकः जॉन.वी. वॉटसन महोदयः सदृशाः मनोवैज्ञानिकाः स्वीकुर्वन्ति यत् अस्याः संचेतनायाः मापनं न भवितुमर्हति। अस्य परिदर्शनाय व्यवहारे तैः बलप्रदत्तम्।
- **प्रदत्तज्ञानम् (Phenomenology)**- अस्यामवस्थायां स्व वैयक्तिकेषु अनुभवेषु जगतः दर्शनस्य दृष्टिकोणेषु बलं प्रयच्छति। अयं पर्यावरणसंचेतनात्मकः संप्रत्ययः केवलं न वैज्ञानिकः वा मनोवैज्ञानिकः सम्प्रत्ययः अपितु भावात्मक-आध्यात्मिक इत्युभयोः बुद्धयोः एकः व्यावहारिकः विस्तारोऽस्ति। अयं दर्शनन्तु प्रकृतिः न केवलं संसाधनमस्ति अपितु एषः सम्प्रत्ययः पर्यावरण-संचेतना मानवपशवोरूभयोः जीवनस्य अभिन्नमङ्गमेवञ्च चेतनायाः विस्तरानुभवे सहकरोति। मुख्यत्वेन अस्मिन् वर्णिताः विषयाः अधोलिखिताः सन्ति। यथा-

**क. सहानुभूतिः (Empathy) इत्यस्य विस्तरः**

- **सहानुभूतिः (Empathy) -** इत्यस्य विस्तरः प्रति भावात्मकबुद्धिः न केवलं मानवान् पशून् सहानुभूतिं प्रयच्छति अपितु प्रकृतौ ये विषयाः सन्ति। तान् सर्वान् प्रति सहानुभूति प्रयच्छन्ति। वस्तुतस्तु पर्यावरणे स्थितानां सर्वेषां आवश्यकतादुःखादीनां च अनुभूतौ क्षमतां प्रयच्छति।
- **पर्यावरणेन सह सहसम्बन्धः**- यदा वयं पर्यावरणनाशेन समुत्पन्नानां समस्यानां दृढानुभूति कुर्मः तदा एषा संवेदना पर्यावरणस्य अनुकूलां जीवनशैलीं स्वीकर्तुं प्रेरितो भवामः।
- **भावानां सम्यग् प्रबन्धनम्-** एषा भावात्मिका बुद्धिः जलवायुपरिवर्तनेन सम्बद्धां चिन्तां वा निराशां नियन्त्रणाय एवं सकारात्मकान् समाधानान् अन्वेषणे सहयोगं करोति।

**आध्यात्मिकबुद्धेः सन्दर्भे पर्यावरणसंचेतना-**

अनया बुद्धया विभिन्नानामन्तर्सम्बन्धाणां मूल्यानां आत्मीयकरण-मेवञ्च समग्रदृष्टिकोणादीनां विषयाणां महत्त्वपूर्णमध्ययनं क्रियते। यथा-

- **गंभीरमन्तर्सम्बन्धः-** एषा बुद्धिः बोधयति यत् मानवः प्रकृतेः पृथको नास्ति अपितु सोऽपि तस्याः एव एकमभिन्नमङ्गमस्ति।
- **मूल्याणामात्मसतीकरणम्-** एषा कस्यापि बाह्यपुरस्कारं वा दण्डं विनैव आन्तरिकसन्तुष्ट्यर्थं पर्यावरणस्य सम्बद्धं वा तदनुकूलं कार्यकरणाय प्रेरयति।

- **समग्रदृष्टिकोणम्-** एषा लोभेन वा मोहेन विनैव वा तं प्रति उदासीनं भूत्वा प्रकृतेः संसाधानानां अन्येषां च संरक्षणाय अस्मान् प्रेरयति।

उमाभ्यां बुद्धिभ्यां (Eq-S.q) संयोगेन पर्यावरणं प्रति आध्यात्मिकं पारिस्थितिकं Spiritual Ecology जनयति। अत्र भावात्मकबुद्धया स्वपरिवेशं परितः स्थितानां पर्यावरणांशैः भावात्मकरूपेण योगो भवति। तत्रैव आध्यात्मिकबुद्धिस्तु उक्तयोगस्य उच्च नैतिकादर्शं सार्वभौमिकमुद्देश्यं च प्रयच्छति बोधयति च। वस्तुतस्तु मानवव्यवहारस्य एवं च निर्णयस्य प्रक्रियायां उभयोः बुद्धयोः महन्महत्त्वं भवतिं अनेन सुनागरीकावबोधस्य विकासः छात्राणामुपलब्धिषु उन्नयनं द्रुतगत्या भवति। एषा बुद्धिः बोधयति यत् अस्माकं शरीरस्य निर्माणं पञ्चभूतैः (पृथ्वी-जल-अग्नि-वायु-आकाशैश्च) अभवत्। तस्मिनेव पञ्चभूते मानवस्य शरीरं विलीनतामपि प्राप्नोति। वस्तुतस्तु एतादृशः अवबोधः प्रकृतेः सम्मानाय प्रेरयति। भारतीये संस्कृतौ एवं च अन्यासु आध्यात्मिकपरम्परासु प्रकृतिमिश्वररूपं स्वीकृत्य वा मत्वा मानवाः पूजयन्ति। प्रकृतिस्थाः सर्वे विषयाः अस्मत् कृते पूजनीयाः भवन्ति। प्रकृतेः दोहणं वा नाशः मानवानां कृते पापो भवति।

**शोधनिष्कर्षः-**

शोधपत्रेऽस्मिन् प्राच्यमते तत्रैव पाश्चात्यमते पर्यावरणस्य संचेतनायाः यानि च महत्त्वपूर्णानि क्षितिजल-पावक-गगन-समीरादीनि च अङ्गानि सन्ति। तेषु सर्वेषु अङ्गेषु अनुकूलैः तत्त्वैः सह सामञ्जस्य स्थापनमित्यस्ति। प्राच्यमते पर्यावरणं प्रति संचेतनायै बहूनि तत्त्वानि उररीकृतानि सन्ति। यैः प्राच्यसंस्कृतौ उक्तानां पर्यावरणस्य महत्त्वपूर्णमिङ्गानां महत् महत्त्वं प्रतिपाद्य तैरेव मानवानां, प्राणीनां, सजीवानाञ्च जीवनं भवति। अनेन अस्माकं समग्रं विकासं तत्र शारीरिक-सामाजिक-शैक्षिक-भावात्मक-आध्यात्मिकं च विकासं प्रभावितं भवति। उक्तानामङ्गानामस्यां संस्कृतौ देवत्वं प्रदाय सर्वदा नम्रीभावेन तं प्रति कार्तज्ञ्यं तत् पूर्वकं च क्रियां व्यवहारं च सम्पादनाय विभिन्नेषु शाब्दिकप्रमाणेषु निर्देशनमस्ति। तत्रैव पाश्चात्यमते एषा पर्यावरणसंचेतना तु मानवानां मनोविज्ञानेन सम्बन्धितोऽस्ति। तेन साक्षात् मानवानां समग्रं विकासं प्रभावितं भवति। अतः तां प्रति अस्माकमवधानं जाग्रतावस्था सदृशः सर्वदा भवितव्यः।

**सन्दर्भग्रन्थसूची**


1. ऋग्वेद, 1/90/6-8
2. यजुर्वेद 13/27-29
3. मनुस्मृति . 4/56
4. रघुवंशी अरुण (1995) पर्यावरण तथा प्रदूषण हिन्दी ग्रन्थ अकादमी, भोपाल।
5. गौतम रामहेत (2014) संस्कृत साहित्य और पर्यावरण सुधार (आलेख)।
6. सिंह रेनू (2015) वैदिक साहित्य में पर्यावरण चेतना, गोरखपुर।
7. गंगवार राधेश्याम (2016) "संस्कृत साहित्य में पर्यावरण चेतना के सन्दर्भ में।
8. चौधरी मृदुला (2018) प्राचीन भारत में पर्यावरण गयाघाट, वाराणसी।
9. सिंह अरुण कुमार (2022) आधुनिक सामान्य मनोविज्ञान, मोतीलाल बनारसी दास, नई दिल्ली।